**CLASS : 10th** (Secondary) **Code No. 108**

**Series : Sec. April./2021**

*Roll No.* | | | | | | | | | | |

# संस्कृत

## भाग – II

## (वस्तुनिष्ठ प्रश्न)

*(Academic)*

(Only for Fresh/School Candidates)

- *कृपया जाँच कर लें कि **भाग-II** के इस प्रश्न-पत्र में मुद्रित पृष्ठ **7** तथा प्रश्न **20** हैं।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

(i) *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

(ii) *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

(iii) *श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

### खण्डः 'क'

### (रचनात्मकं कार्यम्)

**1.** अस्वस्थतायाः हेतोः दिनत्रयस्य अवकाशार्थं वरुणः प्रधानाचार्यं प्रति पत्रं लिखति। लिखिते पत्रे उचित-पदैः रिक्तस्थानानि पूरयत। $5 \times 1 = 5$

सेवायाम्

प्रधानाचार्यः महोदयः

राजकीयः उच्चविद्यालयः,

भिवानी।

(i) ............

सविनयं (ii) ......... अस्ति यत् अहं गत-सायंकालतः (iii) .......... अस्मि। ज्वरतापेन अहं अत्यन्तं कृशः (iv) ..........। अतः भवान् दिनत्रयस्य (v) .......... स्वीकृत्य माम् अनुगृह्णातु।

भवदीयः शिष्यः

वरुणः

**मञ्जूषा**

| अवकाशम्, अस्मि, ज्वरपीडितः, निवेदनम्, माननीयाः |
|---|

**2.** चित्रं दृष्ट्वा अधः प्रदत्तवाक्यानि पठित्वा च रिक्तस्थानानि उचितमञ्जूषापदैः पूरयत – $5 \times 1 = 5$



(क) अस्मिन् चित्रे .......... वर्णनम् अस्ति।

(ख) ......... मिलित्वा पादपारोपणम् कुर्वन्ति।

(ग) वृक्षारोपणानन्तरं अध्यापिका ........... सिञ्चति।

(घ) बालकाः .......... पादपान् आरोपयन्ति।

(ङ) ......... वृक्षारोपणं लाभकरं भवति।

**मञ्जूषा**

| भूमौ, जलेन, बालकाः, वनमहोत्सवस्य, पर्यावरणदृष्ट्या |
|---|

**खण्डः 'ख'**

**(पठितम् अवबोधनम्)**

**3.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – 3 × 1 = 3

(क) बुद्धिमती चपेटया पुत्रौ प्रहृतवती।

(ख) व्याघ्रं दृष्ट्वा धूर्तः शृगालः अवदत्।

(ग) त्वं मानुषात् बिभेषि।

**4.** प्रदत्तगद्यांशं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत – 2 × 1 = 2

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। सर्वं वृत्तमवगत्य सः तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् सः निर्णेतुं नाशक्नोत्।

*प्रश्नाः* –

(क) आरक्षी तं किमर्थं न्यायालयं नीतवान् ?

(ख) कस्याभावात् सः निर्णेतुं नाशक्नोत् ?

**5.** प्रदत्तश्लोकं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत – $2 \times 1 = 2$

दुष्कराण्यपि कर्माणि मतिवैभवशालिनः।

नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते।।

*प्रश्नाः* –

(क) दुष्कराणि कर्माणि के प्रकुर्वते ?

(ख) 'दुष्कराण्यपि' इति पदस्य सन्धिच्छेदं कुरुत।

**खण्डः 'ग'**

**(अनुप्रयुक्तम् व्याकरणम्)**

**6.** यथानिर्दिष्टशब्दरूपाणि लिखत – $3 \times 1 = 3$

(क) देव - तृतीयाविभक्ति - एकवचने =

(ख) कवि - चतुर्थीविभक्ति - एकवचने =

(ग) नदी - प्रथमाविभक्ति - बहुवचने =

**7.** यथानिर्दिष्टधातुरूपाणि लिखत - $3 \times 1 = 3$

(क) कृ - लट्लकार् - प्रथमपुरुष - एकवचने =

(ख) पठ् - लृट्लकार - मध्यमपुरुष - एकवचने =

(ग) हस् - लट्लकार - प्रथमपुरुष - बहुवचने =

**8.** प्रदत्त-उपपदविभक्तिवाक्येषु उचितविभक्तिप्रयोगं कुरुत - $3 \times 1 = 3$

(क) ........... निकषामृतशरीरं वर्तते। (राजमार्गं/राजमार्गेण)

(ख) छात्रः ......... प्रतिगच्छति। (विद्यालयं/विद्यालयात्)

(ग) .......... बहिः वनम् अस्ति। (ग्रामं/ग्रामात्)

**9.** प्रदत्तवाक्येषु रिक्तस्थानपूर्तिम् अव्ययपदैः कुरुत – $3 \times 1 = 3$

(क) ........... जीवनं दुर्वहम् अस्ति। (अत्र/तत्र)

(ख) भूकम्पितसमये .......... गमनमेव उचितं भवति। (बीहः/दूरम्)

(ग) इदानीं वायुमण्डलं ......... दूषितमस्ति (एव/भृशं)

**खण्डः 'घ'**

**(बहुविकल्पीयप्रश्नाः)**

***प्रदत्तचतुर्षु उत्तरेषु शुद्धम् उत्तरं चित्वा लिखत –*** $11 \times 1 = 11$

**10.** 'प्रकृतिरेव' इत्यत्र कः सन्धिः वर्तते ?

(i) प्रकृतिः + एव (ii) प्रकृति + रेव

(iii) प्रकृतिरे + व (iv) प्रकृतिः + देव

**11.** 'कज्जलमलिनम्' अत्र कः समासः ?

(i) बहुव्रीहिः (ii) कर्मधारयः

(iii) द्वन्द्वः (iv) द्विगुः

**12.** 'समीरचालिता' अत्र समासविग्रह किं भवति ?

(i) समीरेण चालिता (ii) समीराय चालिता

(iii) समीरात् चालिता (iv) समीरेषु चालिता

**13.** 'दुर्दान्तैः दशनैः' अत्र विशेष्यपदमस्ति ?

(i) दुर्दान्तैः (ii) दशनैः

(iii) दान्तैः (iv) दुरैः

**14.** 'पाषाणी सभ्यता' अत्र विशेषणपदमस्ति ?

(i) पाषाणी (ii) सभ्यः

(iii) ता (iv) सभ्यता

**15.** 'स्थितः' अत्र कः प्रत्ययः ?

(i) क्त (ii) क्तवतु

(iii) तः (iv) स्थि

**16.** 'कृत्वा' अत्र कः प्रत्ययः ?

(i) अनीयर् (ii) क्त

(iii) क्त्वा (iv) तल्

**17.** 'संपत्तौ' अस्य विलोमपदम् वर्तते ?

(i) विरतौ (ii) विगतौ

(iii) विसतौ (iv) विपत्तौ

**18.** 'पाषाणम्' अत्र समानार्थकपदम् अस्ति ?

(i) आम्रम् (ii) वनम्

(iii) प्रस्तरम् (iv) तनुः

**19.** 'सप्तवादनम्' कः समयो भवति ?

(i) सात बजा है (ii) आठ बजा है

(iii) नव बजा है (iv) छः बजा है

**20.** '3 : 30' संस्कृतभाषायां किं भवति ?

(i) सार्धपञ्चवादनम् (ii) सार्धषड्वादनम्

(iii) सार्धत्रिवादनम् (iv) सार्धदशवादनम्